# Shri Krishnavarada Ashtakam

# श्रीकृष्णवरदाष्टकम्

## Document Information

Text title : Shri Krishnavarada Ashtakam 06 13

File name : kRRiShNavaradAShTakam.itx

Category : vishhnu, aShTaka, krishna

Location : doc_vishhnu

Author : Shrikrishnalilashukamahakavimuni

Proofread by : Gopalakrishnan

Description/comments : From stotrArNavaH 06-13

Latest update : September 18, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2021

*sanskritdocuments.org*

# श्रीकृष्णवरदाष्टकम्

परमानन्दसर्वस्वं पाशुपाल्यपरिष्कृतं
चिरमास्वादयन्ती मे जृम्यतां चेतसिस्थितिः । (चेतस)
दूरदूरमुपारुह्य पतत‍ामपि चान्तरा
सकृदाक्रन्दनेनैव वरदः करदो भवेत् ॥ १॥

मम चेतसि माद्यतो मुरारेः
मधुरस्मेरमुपाध्वमाननेन्दुम् ।
कमनीयतनोः कटाक्षलक्ष्मीं
कन्ययापि (कलयापि) प्रणतेनु(षु) कामधेनोः ॥ २॥

वरदस्य वयं कटाक्षलक्ष्मीं
वरयामः परमेण चापलेन ।
सकृदप्युपगम्य सम्मुखं
सहसा वर्षति योषितोऽपि कामम् ॥ ३॥

जृम्भतां वो हृदये ? ? जगत्त्रयीसुन्दराः कटाक्षभराः ।
अम्भोदान् गगनचरानाह्वयमानस्य बालस्य ॥ ४॥

जृम्भन्तां वः करिगिरिजुषः कटाक्षच्छटा विभोर्मनसि ।
अम्भोधरमधःकृत्वा हषान् (हर्षात्स्वै) स्वरं शयानस्य ॥ ५॥

ब्रजजनवनितामदान्धकेलि-
कलहकटाक्षावलक्षविभ्रमो वः ।
विहरतु हृदये विलाससिन्धु-
र्मुहुरबिलङ्घितमुग्धशैशवश्रीः ॥ ६॥

वरवितरणकेलिधन्यधन्या
मधुरतराः करुणाकटाक्षलक्ष्म्याः ।
करिगिरिसुकृताङ्कुरस्य कस्या-

भिनववारिवहस्य विभ्रतां वः ॥ ७॥

इत्यष्टकं पुष्टरसानुबन्धं
विनोदगोष्ठीसमये वियुङ्क्ताम् ।
व्रजाङ्गनानां कुचयोः करीन्द्र-
शैलस्य मौलौ च मुहुर्विहर्ता ॥ ८॥

श्रीकृष्णलीलाशुकवाङ्मयीभि-
रेवंविधाभिर्विबुधाहताभिः ।
पुष्णन्तु धन्याः पुनरुक्तहर्ष-
मायूंषि पीयूषतरङ्गिणीभिः ॥ ९॥

इति कृष्णलीलाशुकमहाकविमुनिविरचितं श्रीकृष्णवरदाष्टकं सम्पूर्णम् ।

Proofread by Gopalakrishnan

*Shri Krishnavarada Ashtakam*

pdf was typeset on September 18, 2021

Please send corrections to *sanskrit@cheerful.com*